③ स्वदेशमातुः परमं सुपुत्रं
मेधाविनं तं सततं दुरन्तम्।
आनन्दरामं पुरुषं महान्तम्
नमामि भक्त्या नियतं भवन्तम् ॥ 6 ॥

⇒ **अन्वयः** → स्वदेशमातुः तं परमं सुपुत्रं, मेधाविनं सततं दुरन्तम्, महान्तं पुरुषं भवन्तं आनन्दरामं भक्त्या नियतं नमामि।

**सन्दर्भः** → पद्यमिदं मुकुन्द माधव शर्मेण विरचितायाः स्तुतिप्रशस्तिमञ्जर्याः "आनन्दरामबरुवामहाभागाय प्रणतिः" इति शीर्षकप्रशस्तेः समुद्धृतमस्ति। अत्र आनन्दरामबरुवामहोदयाय प्रणतिः निवेदिताऽस्ति।

**व्याख्या** :→ स्वदेशमातुः = निजराष्ट्रजनन्याः, परमं = श्रेष्ठं, सुपुत्रं = वरद पुत्रम्, मेधाविनं = बुद्धिशालिनं, कुशाग्रबुद्धियुक्तं, मतिमन्तम्, तं = विद्वद्वरेण्यं, सततं = सर्वथा, दुरन्तम् = अनन्तं,

Date
15.07.2020

स्तुतिप्रशस्तिमञ्जरी (KS Sir)

अन्तहीनमिति भावः, महान्तं = वरेण्यम्, पुरुषं = पण्डितं, भवन्तम् आनन्दरामं = आनन्दराम बरुवा नामधेयं पण्डितप्रवरं अहं = ग्रन्थकारः, भक्त्या = भक्तिभावपूर्वकं, नितं = सदा, स्तवीद = नमामि = स्तौमि, प्रणामाञ्जलिं विनिवेदयामि।

छन्दः → पद्येऽस्मिन् उपजाति छन्दः वर्तते। तल्लक्षणं यथा →

अनन्तरोदीरितलक्ष्मभाजौ, पादौ यदीयावुपजातयस्ताः।
इत्थं किलान्यास्वपि मिश्रितासु वदन्ति जातिष्विदमेव नाम॥